ॐ

# संस्कृतभारती-तेलङ्गाणा
# पत्रालयद्वारा संस्कृतम्
# Instructions List

समयः – घण्टात्रयम्
पूर्णाङ्काः – 100

**दिनम् - रविवासरः**
**रविवासरः २३-०२-२०२५**

---

Instruction

- Please Do not send your answer sheet through any email address. **Please send answer sheet through post only**
- We will issue an _Acknowledgement through our acknowledgement link (sbtelangana.in/ack) **and this link** will be activated on 04/03/2025. Before this time period please don't ask for any acknowledgement or confirmation.
- **Please send your answer script through post,courier or any other means to below given office address**
- **ANY Question is saying to answer in English or own language means that you can write your answer in any of these three language that is English,Hindi,Telugu**
- Please Post your answer script to this office address

  **Mobile:** 8332834852
  **Address:** Samskrita Bharati,Plot no. 176/1, Brahma Vidya Kuteer,
  Gurukulam lane,Secretariat (Sriramnagar)Colony,
  Puppalaguda, Manikonda;
  Hyderabad, Telangana State.
  Pincode-500089.
  Phone Number: 8332834852

**Important Note:**

- **Only answer sheet send through post will be forwarded for correction**
- **Wherever translation to sanskrit is written in question paper. It must be understood and must be translate in Devanagari Leepi**

# संस्कृतभारती - तेलङ्गाणा

## पत्रालयद्वारा संस्कृतम् – फरवरी –२०२५

## कोविदपरीक्षा

समयः घण्टात्रयम् दिनाङ्कः २३-२-२०२५

पूर्णाङ्काः १०० क्रोधिनामसंवत्सरः-माघ-कृष्ण-दशमी, भानुवासरः

---

1. अ) समस्तपदं लिखित्वा समासनाम लिखत (षण्णाम्)। ६x१=६

१. पुस्तकं हस्ते यस्याः सा। ५. विद्याप्रधानम् केन्द्रम्

२. भार्यया सह वर्तते ६. मातुः समीपे

३. लक्ष्मी च सरस्वती च ७. वन्यश्चासौ द्विपश्च

४. दोषाणाम् अभावः ८. तव आरम्भः

आ) अधो निर्दिष्टेषु पदेषु षण्णां विग्रहवाक्यानि लिखित्वा समासनाम लिखत। ६x१=६

९. गुरुदेवः १३. यथाशास्त्रम्

१०. छायातरवः १४. संसारकूपः

११. क्रोधोद्वेगभयाः १५. अबला

१२. नारिकेलवृक्षः १६. जटिलीकृत्य

इ) अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितानि पदानि परिष्कुरुत। ५x१=५

१७. अनुष्टप् छन्दसि षड्विंशतिः अक्षराणि सन्ति। २०. इच्छार्थे णिच् प्रत्ययः।

१८. तत्पुरुषसमासः सङ्ख्यावाचकपूर्वपदसमासः। २१. गीतम् वाद्यम् अभिनयः-एतेषां समाहारःसङ्गीतम्।

१९. श्रीकण्ठः भवभूतेः पिता। २२. द्वित्त्वाक्षरात् पूर्वाक्षरं लघुः भवति।

ई) विग्रहवाक्यं लिखत। ३x२=६

२३. पत्रालयसंस्कृताय २४. श्लोकान्वयक्रमः २५. युद्धप्रस्थानसमयः

उ) सूक्तिद्वयस्य विवरणं स्वभाषया लिखत। २x१=२

२६. अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।

२७. आ नो भद्राः क्रतवो यन्तु विश्वतः।

२८. यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्।

**2.** अ) अधोनिर्दिष्टानां तद्धितान्तानां विग्रहवाक्यं लिखत। ६x१=६

२९. शाकुन्तला ३१. सभ्यः ३३. पितरौ

३०. मातुलानी ३२. श्रीमती ३४. सामाजिकः

आ) निर्देशानुसारम् उत्तरं लिखत। ६x१=६

क) णिजन्तरूपाणि लिखत।

३५. क्रीञ् ( णिच्, प्र पु, बहु व ) ३६. आ+ णीञ् ( णिच्, उ.पु एक व )

ख) णत्वनिर्णयं कृत्वा रूपाणि लिखत।

३७. कार्यदर्शिशब्दस्य तृतीया एकवचनम्। ३८. रूप्यक शब्दस्य षष्ठी बहुवचनम्।

च) तरप् / तमप् प्रत्ययौ उपयुज्य वाक्यानि पूरयत।

३९. तूलाश्मनोः अश्मा ----------- (गुरु/लघु)   ४०. पाण्डवेषु सहदेवः -------- ( ज्येष्ठ/कनिष्ठ)

इ) अधो दत्तानां विवृतवाक्यानां सन्नन्तरूपाणि/सन्नन्तरूपाणां विवरणवाक्यानि वा लिखत। ५x१= ५

४१. तितीर्षथ   ४३. जिगमिषामः   ४५. प्रष्टुमिच्छसि

४२. ईप्सावः   ४४. लेखितुमिच्छतः

3.अ) गुरुलघुचिह्नम् अङ्कयित्वा गणनाम लिखत (पञ्चानाम्)। ५x१ = ५

४६. सवितृ   ४८. करोमि   ५०. ऋषयः

४७. क्षमाराव्   ४९. कर्तारम्   ५१. पृच्छामि

आ) गुरुलघुचिह्नानि अङ्कयित्वा छन्दसः नाम निर्दिशत। १x३=३

५२. शय्योत्तरच्छदविमर्दकृशाङ्गरागम्

इ) अधो दत्तेषु वाक्येषु कः अलङ्कारः तस्य कारणं किम् ? (त्रयाणाम्) ३x१=३

५३. कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते।   ५५. इयं लक्ष्मीः मम गृहमागता।

५४. शारदा शारदाम्भोजवदना वदनाम्बुजे।   ५६. लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलम्।

4.अ) त्रयाणाम् अन्वयार्थं तात्पर्यं च संस्कृतेन लिखत। ३x३=९

५७. सुहृद्भिराप्तैरसकृद्विचारितं स्वयं च बुद्ध्या प्रविचारिताश्रयम् ।
करोति कार्यं खलु यःस बुद्धिमान् स एव लक्ष्म्या यशसां च भाजनम् ।।

५८. कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तिं सुते दुष्कृतं या हिनस्ति।
तां चाप्येतां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः ।।

५९. आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः।
परं परोपकारार्थं यो जीवति स जीवति ।।

६०. गङ्गा पापं शशी तापं दैन्यं हरति कल्पतरुस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः ।।

आ) पद्यद्वयस्य पदविभागम् अन्वयरचनां च लिखत। २x४=८

६१. स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ।।

६२. अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।।

६३. सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः।
न पारणा स्याद्विहिता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ।।

5. अ) कः केन किम् अवदत् इति संस्कृतेन लिखत। ६x१=६

६४. तद्विषये विवरणं ज्ञातुमहमुत्सहे।

६५. आत्मीयानां सहवासेन आनन्दः भवति।

६६. सर्वथा सः तव अनुरूपो न।

६७. वेदाः अप्रमाणम्, शास्त्राणि निन्द्यानि।

६८. इदं कार्यं त्वया कर्तव्यम्।

६९. मम जीवनमेव समर्पयितुमहं सिद्धा।

आ) संस्कृतेन उत्तरं लिखत (पञ्चानाम्)। ५x१=५

७०. नाटके कति विधाः अभिनयाः सन्ति

७१. कणादः इति नाम कथमागतम्

७२. काव्यं कति विधम्

७३. आर्यभटः कस्मिन् वर्षे कलियुगस्य आरम्भः इतिअवदत्

७४. रूपकभेदान् लिखत

७५. अर्थान्तरन्यासालङ्कारस्य लक्षणं किम्

इ) संयोजयत। ६x१=६

( वेङ्कध्वरिः , अश्वघोषः, दण्डी, धनपालः, भट्टनारायणः, राजराधाकान्तः, हेमचन्द्रः )

७६. ऋषभपञ्चाशिका -

७७. काव्यादर्शः -

७८. कुमारपालचरितम् -

७९. वेणीसंहारम् -

८०. शब्दकल्पद्रुमः -

८१. सौन्दरानन्दम् -

ई) अधो दत्तं विषयम् अधिकृत्य मित्रं प्रति एकं लेखं (पत्रं) लिखत। १x३=३

८२. परीक्षालेखनार्थं कृतप्रयत्नाः

उ) अधः प्रदत्तान् बिन्दून् उपयुज्य दत्तं विषयम् उद्दिश्य संस्कृतेन प्रबन्धं दशवाक्यैः रचयत। १x४=४

८३. चरवाणी

( आविर्भावावश्यकता, कार्यपद्धतिः, सदुपयोगाः, दुरुपयोगाः, सामाजिककर्तव्यम्, अस्माकं कर्तव्यम् )

ऊ) अन्तलिङ्गविभक्तिवचनानि / पदविवरणं लिखत (षण्णाम्)। ६x१=६

८४. व्यवस्थायै

८५. देशभक्तिः

८६. धारयतम्

८७. अथ

८८. उपनिषदः

८९. कीदृशीनाम्

९०. मूर्तम्

******

जयतात् संस्कृतम् – जयतात् भारतम्

*******